औपनिषद सिद्धान्ते ईश्वरमाययोः स्वरूपम्

Dr. K. Ganapathy Bhat

तावदद्वैतवेदान्ते परमतत्वं 'ब्रह्म' शब्देन व्यवहियते। इदमेव जगतोऽधिष्ठानभूतम्। अस्मिन् सिद्धान्ते-"एकमेवाद्वितीयं ब्रह्म"[1] "नेह नानास्ति किञ्चन"[2] "इदं सर्व यदयमात्मा"[3] इत्यादिश्रुतिबलेन ब्रह्मण : स्वगत-सजातीय-विजातीयभेदराहित्यं[4] देश-काल-वस्तु-परिच्छेदशून्यत्वं[5] च प्रतिपाद्यते। श्रुतिषु सगुण-निर्गुणभेदेन ब्रह्मण : स्वरूपद्वयमुपवर्णितम्। तथा चोक्तम्- "द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च"[6] इति। तथा "यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंवशन्ति । तद्विजिज्ञासस्व। तद्ब्रह्मेति"[7] इत्यादीनि सृष्टि स्थिति-संहारप्रतिपादकानि वचनानि, तथा "सत्यं ज्ञानमनन्तं ब्रह्म"[8] इति।

"यो वै भूमा तत्सुखम्"[9] "विज्ञानमानन्दं ब्रह्म"[10] इत्यादिस्वरूपप्रतिपादनपराणि । च वचनानि ब्रह्मण : सगुणस्वरूपं प्रतिपादयन्ति। "अस्थूलमनणवह्रस्वमदीर्घमलोहितम्[11]" "अशब्दमस्पर्शमरूपमव्ययम्[12]" इत्यादिनिषेधवचनानि च ब्रह्मणो निर्गुणत्वे प्रमाणानि।

अद्वैतिन : स्वरूपतटस्थभेदेन ब्रह्मणो लक्षणद्वयं सङ्गिरन्ते। तदनुसारेण सच्चिदानन्दरूपत्वं स्वरूपलक्षणम्, सृष्टि-स्थिति-संहारकर्तृत्वं च तटस्थलक्षणमिति पर्यवस्यति।

पूर्वोक्तेऽपरिच्छिन्ने ब्रह्मण्यनादिकल्पिततादात्म्यसंबन्धेनानादिकल्पिता मूलप्रकृतिस्तिष्ठति। सा च सत्त्वरतजस्तमोगुणमयी। इयं च अविद्या-अज्ञान-प्रकृति-माया-शक्ति-प्रधानादिभिर्नामभि-र्व्यवहियते। नैयायिकादयोऽज्ञानं नाम ज्ञानाभाव इति नञोऽभावरूपत्वं प्रतिपादयन्ति, किन्त्वद्वैतिन आवरणविक्षेपशक्तिमदनादिभावरूपमज्ञानमित्यङ्गीकुर्वन्ति। तदुक्तं चित्सुखाचार्यै :-

अनदि भावरूपं यद्विज्ञानेन विलीयते।
तदज्ञानमिति प्राज्ञा लक्षणं संप्रचक्षते[13] ।। इति।

अस्य च विद्यया निवर्त्यमानत्वादविद्येति, प्रपञ्चस्योपादानत्वात् प्रकृति :, प्रधानमिति वा, दुर्घटकार्यसम्पादकत्वाद् मायेति, स्वातन्त्र्याभावाच्छक्तिरिति च व्यवहार : इदं चाज्ञानं सिद्धान्ते सदसद्भ्यां विलक्षणमनिर्वचनीयरूपम्[14]। किञ्चात्र "न ज्ञानमज्ञानम्" इत्यत्र नञो नाऽभावरूपत्वम्, किन्तु विरुद्धार्थकत्वाद् भावरूपत्वम्, उत्पत्तिराहित्याच्चानादित्वम्,

प्रकाशेनाऽन्धकारवद् ज्ञानेन निवर्त्यमानत्वाच्च सांशत्वं स्वीक्रियते।[15]

तत्र तावदज्ञाने अहमज्ञ : इति सर्वऽनुभवसिद्धं प्रत्यक्षमेव प्रमाणम्। अथाप्यस्यानुभवस्य ज्ञानाभावात्मकत्वेन व्याख्यातृन् तर्करसिकान् नैयायिकान् प्रत्यनुमानमत्युपस्थाप्यते। तदनुमानाकारं प्रदर्शितं श्रीमद्भिर्विद्यारण्यस्वामिभि : - "विमतं प्रमाणज्ञानं स्वप्रागभावव्यतिरिक्त स्वविषयावरणास्वदेशगतवस्त्वन्तरपूर्वकं भवितुमर्हति, अप्रकाशितार्थप्रकाशकरत्वात्, अन्धकारे प्रथमोत्पन्नप्रदीपप्रकाशवत्"[16] इति। अत्र ज्ञानमात्रस्य पक्षत्वेऽनुवादज्ञाने हेत्वसिद्धिः, तस्य प्रकाशितार्थप्रकाशकत्वात्। तस्मात् प्रमाणाज्ञानमित्युक्तम्। किञ्च, धारावाहिकप्रमाणज्ञानव्यावृत्यर्थं विमतमिति प्रमाणज्ञानस्य विशेषणं प्रदत्तम्, अन्यथा सिद्धसाधनतापत्तेः। अत्राऽयं भावः- विषयेन्द्रियसंयोगेन घटस्य प्रमात्मकं ज्ञानं भवति। तच्च विरोधिवृत्यन्तरोत्पत्तिपर्यन्तं दीपशिखेव अयं घट :, अयं घट : इति रूपेण प्रवहत् तिष्ठति। इदं च धारावाहिकं ज्ञानं प्रथमोत्पन्नप्रमाणज्ञानस्य सजातीयमिति प्रमाणज्ञानमित्येवोच्यते। अत्रोत्तरोत्तरधारायाः पूर्वपूर्वधारा तु वस्त्वन्तरं भवतीति तादृशपूर्वधारामादाय सिद्धसाधनतापत्तिरिति विमतम् इति प्रमाणज्ञानस्य विशेषणम्। धारावाहिकज्ञाने वैमत्याऽभावान्न तत् पक्षकक्षामधिरोहति। एवमेव वस्तुपूर्वकमित्येवोक्ते स्वाश्रयेणऽऽत्माऽन्तःकरणादिना सिद्धसाधनता स्यादिति वस्त्वत्वन्तरेत्युक्तम्। पुनः स्वाश्रयातिरिक्तचक्षुरादिसामग्रीनिवारणाय स्वदेशगतेति, कार्यसामान्यं प्रति कारणस्यादृष्टस्य निवारणाय स्वनिवर्त्येति, प्रमाणज्ञानेन धर्मादीनां निवृत्त्यभावात्। पूर्वज्ञानवारणाय स्वविषयावरणेति, योग्यविभुविशेषगुणानां स्वोत्तरवर्तिगुणनाश्यत्वनियमेनोत्तरप्रमाणज्ञानेन पूर्वप्रमाणज्ञानस्य निवृत्तिसंभवेऽपि पूर्वज्ञानेनोत्तरज्ञानविषयस्यावरणाऽसंभवात्, कार्यं प्रति प्रागभावस्यापि कारणत्वात् तादृशप्रागभावमादाय सिद्धसाधनताऽर्थान्तरो वा मा भूदिति स्वप्रागभावव्यतिरिक्तेति चोक्तम्। एवमुक्ताऽनुमानेनाभीप्सितस्य सिद्धिः । उक्तं च सर्वज्ञात्ममुनिना-

नाभावताऽस्य घटते वरणात्मकत्वाज्ज्ञाभाववामावरणमाहरभावशौण्डा :।
अज्ञानमावरणमाह च वासुदेवस्तद्भावरूपमिति तेन वयं प्रतीम :[17] ।। इति।

तत्राज्ञाने आवरणविक्षेपाख्ये द्वे शक्ती वर्तेते। आवरणशक्तिब्रह्मस्वरूपमावृणोति, विक्षेपशक्तिश्चाखिलमिदं जगत् तत्र कल्पयति। तदुक्तं शङ्करभगवत्पादैः-

शक्तिद्वयं हि मायाया विक्षेपाऽऽवृत्तिरूपकम्।
विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत् सृजेत्।।
अन्तर्दृग्वृश्ययोर्भेदं बहिश्च ब्रह्मसर्गयो : ।
आवृणोत्यपरा शक्ति : सा संसारस्य कारणम्।।[18] इति।

ननु परिच्छिन्नेनाज्ञानेन कथं ब्रह्मण आवरणसंभव इति चेत् सत्यम्। नह्याज्ञानस्य वस्तुतो ब्रह्माऽऽवरकत्वम्, आथापि यथा मेघोऽवलोकियितृनयपथपिधायकतयाऽनेकयोजनायतमादित्यम ण्डलमाच्छादयन्निव प्रतिभाति, तथाऽज्ञानं परिच्छिन्नमप्यात्मानमपरिच्छिन्नमसंसारिणमवलोकयितुर्द्धपिधायकतयाऽऽच्छादयन्निव प्रतीयते। तथा चोदाहृता हस्तामलकोक्ति : श्रीमता सदानन्दयतिना

घनच्छन्नदृष्टिर्घनच्छन्नमर्कं यथा मन्यते निष्प्रभं चातिमूढ : ।
तथा बद्धवद् भाति यो मूढदृष्टे : स नित्योपलब्धिस्वरूपोऽहममात्मा[२१]।। इति।

अद्वैतसिद्धान्ते ज्ञानस्याश्रयत्वविषये परस्परवैमत्यं दृश्यते। तत्र सर्वज्ञात्ममुनि : -

आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो हि पश्चिमो नाऽऽश्रयो भवति नापि गोचर :[२२] ।।

इत्यज्ञानस्याश्रयो विषयश्च शुद्धचैतन्यमेवेति पक्षमुपस्थापयति। अज्ञानसिद्ध्युत्तरकाले हि जीवसिद्धिः। अत उत्तरकालीने जीवे न पूर्वताज्ञानस्याश्रयत्वं विषयत्वं वा संभवतीति मुनेस्तात्पर्यम्। । एतन्मतानुसारेण अहमज्ञ : इति जीवे प्रतीयमानस्याज्ञानस्य नाऽहङ्कारविशिष्ट चैतन्यमाश्रयः, किन्त्वहङ्कारोपहितं शुद्धचैतन्यमेवेति विज्ञेयम्। एवं शुद्धचैतन्याश्रितमप्यज्ञानं स्वकृतसंसारबन्धनं जीव एव समुत्पादयति, उपाधेः प्रतिबिम्बपक्षपातित्वात् तदुक्तं मुनिना -

सुकृतदुष्कृतकर्मणि कर्तृतां मतिगतात्मधितिप्रतिबिम्बकम्।
व्रजति तद्वदद : परमात्मने जगति याति तमःप्रतिबिम्बकम्।।[२३] इति।

श्रीवाचस्पतिमिश्रा : - "नाविद्या ब्रह्माश्रया, किन्तु जीवे। सा त्वनिर्वचनीया[२३], विद्यास्वभावे ब्रह्मणि तदनुपपत्ते[२३]: " इत्यादिस्थलेष्वज्ञानस्य जीवाश्रितत्वं ब्रह्माविषयत्वं च प्रतिपादयामासुः। अतोऽऽध्यासिकसम्बन्धेन ब्रह्मणि विद्यमानमप्यज्ञानमाच्छाद्यतासम्बन्धेन जीव एव वर्तते, न तु ब्रह्मणि। नास्ति ब्रह्म, न भाति ब्रह्म इत्यसत्वाऽऽपादकाऽभानाऽऽपादकयोरावरणयोर्जीवे एव सम्भवाज्जीवाश्रय ब्रह्मापदा ह्यविद्या इति एकदर्शिनि : कथयन्ति।

इदं चाज्ञानं "माया चाविद्या च स्वयमेव भवति[२४]" इति श्रुत्या माया, अविद्या चेति द्विविधं भवति। तत्र रजस्तमोभ्यामनभिभूतशुद्धसत्वगुणप्रधानतया माया इति। रजस्तमोभ्यामभि भूताऽशुद्धसत्वगुणप्रधानतया च अविद्या इति कथ्यते। इमे एव मायाऽविद्ये समष्टयज्ञानं व्यष्ट यज्ञानमिति च व्यवह्रियेते। तत्र समष्टयज्ञानरूपा माया विक्षेपांशप्रधाना, व्यष्टंयज्ञानरूपाविद्या चावरणांशप्रधानेति प्रतिपाद्यते। एताहशशुद्धसत्त्वप्रधानमायोपाधिना च पूर्वोक्तब्रह्मचैतन्यमेव ईश्वरः

इति, मलिनसत्वप्रधानाविद्योपाधिना जीव:इत्याख्यायते। तत्र मायोपाधेः शुद्धत्वादीश्वरःसर्वज्ञत्वादिगुणयुक्तः, अविद्योपाधेरशुद्धत्वाच्च जीवोऽल्पज्ञत्वादिगुणयुक्तः । तदुक्तं श्रीमता सदानन्दयतिना- इयं समष्टिरूत्कृष्टोपाधितया विशुद्धसत्त्वप्रधाना। एतदुपहितं चैतन्यं सर्वज्ञत्व-सर्वेश्वरत्व-सर्वनियन्तृत्वादिगुणकमव्यकतमन्तर्यामी जगत्कारणमीश्वर इति च व्यपदिश्यते, सकलाज्ञानावभासक तत्वात्, इयं व्यष्टिर्निकृष्टोपाधितया मलिनसत्त्वप्रधाना। एतदुपहितं चैतन्यमल्पज्ञत्वानीश्वरत्वादिगुणकं प्राज्ञ[५] इत्युच्यते, एकाज्ञानावभासकत्वात्[६] इति।

REFERENCES

१. त्रि.म.ना. ३-३

२. बृ.उ.४-४-१९

३. बृ. उ. २-४-६

४. मनुष्यस्य शरीरगतैर्हस्तपादादीन्द्रीयैयो भेदःस स्वगतभेद : मनुष्यस्य मनुष्यान्तरेण यो भेदः स सजातीय पक्ष्यादिभिर्यो भेद : स विजातीयभेद इत्युच्यते। ब्रह्मण : शरीराद्यवयवाभावान्न तस्य स्वागतभेद; ब्रह्मसदृशब्रह्माऽभावान्न सजातीयभेद :, ब्रह्मातिरिक्तस्य सर्वस्यापि कल्पितत्वान्न विजातीयभेदः संभवातीति तात्पर्यम्।

५. परिच्छन्नत्वं हि देशत : कालतो वस्तुतश्चेति त्रिविधम्। तत्र अत्यन्ताभावप्रतियोगित्वं देशपरिच्छिन्नत्वम्, न तु देशान्तरेऽसत्वं स्वदेशमात्रसत्वं वा। ध्वंस - प्रागभावयोः प्रतियोगित्वं कालपपरिच्छिन्नत्वम्, अन्योन्याभाव प्रतियोगित्वं च वस्तुपरिच्छिन्नत्वमिति विज्ञेयम्। ब्रह्मण आकाशवद् व्यापकत्वान्न तस्य देशपरिच्छेद :, सर्वऽकत्वाच्च न वस्तु परिच्छेद इति बोध्यम्।

६. बृ ० उ० २।३।१

७. तै ० उ ० ३।१

८. तै ० उ ० २ ।१.

९. छा ० उ ० ७।२३।१

१०. बृ ० उ ० ३ ।९।२८

११. बृ ० उ ० ३।८।८

१२. कठ०१।३।१५

१३. तत्व ० प्र ० पु ० १७.

१४. सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।
साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुताऽनिवर्चनीयरूपा।।। (वि ० चू ० १११ श्लों ०)

१५. वृत्तिप्रभाकरे, पृ ० ४१८-४११.

१६. वि ० प्र ० सं ० पृ ० ५८

१७. सं ० शा० १।३२०

१८. वा ० सु ० १३, १५ श्लो०।

१९. वे ० सा ० पृ ० १४

२०. सं० शा ०१।३१९

२१. सं० शा०१।३२७

२२. ब्र० सू० भा० १।१। ४

२३. ब्र०सू०भा०१ । ४। ३

२४. नृसिंहो०१ खण्डे।

२५. "अस्य जीवस्यास्पष्टोपाधितया रजस्तमोभ्यामभिभूतस्तावत्प्रधानव्यष्ट्यज्ञानोपाधिकत्वेन हेतुनाऽतिप्रकाशकत्वाभावात्[1] प्राज्ञशब्दवाच्यत्वमित्यर्थ :।
प्रायेणज्ञ : । प्रायेणज्ञ : प्राज्ञ इत्युक्तं भवति" (वै० सा ० विद्वन्मनोरञ्जिनी, पृ० ९४) ।

२६. वे०,सा०, पृ० ९-११